M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref.
Ser. 114
Title: Bhagavata - 9th Adhyaya 4th Skandha

Patre

Title	Ninth adhyāya of the fourth Skandha of Bhāgawata
Author	
Editor	
Year, Vols.	
Publisher	
Remarks	114

114

भा० ध्रु श्रीगणपतयेनमः ।। मैत्रेयउवाच।। तएवमुत्सन्नभयाउरुक्रमेकृ
तावनामाःप्रययुस्त्रिविष्टपं।। सहस्रशीर्षापिततोगरुत्मतामधोर्व
१ नंभृत्यदिदृक्षयागतः १ सवैधियायोगविपाकतीव्रयाहृत्पद्मको
शेस्फुरितंतडित्प्रभं।। तिरोहितंसहसैवोपलक्ष्यबहिःस्थितंतदवस्थं
ददर्श।। २ तद्दर्शनेनागतसाध्वसःक्षिताववंदतांगंविनमय्यदंडव
त्।। दृग्भ्यांप्रपश्यन्प्रपिबन्निवार्भकश्चुंबन्निवास्येनभुजैरिवाश्लि
षन्।। ३ सतंविवक्षंतमतद्विदंहरिर्ज्ञात्वास्यसर्वस्यचहृद्यवस्थितः
कृतांजलिंब्रह्ममयेनकंबुनापस्पर्शबालंकृपयाकपोले ४ सवै १
तदैवप्रतिपादितांगिरंदैवींपरिज्ञातपरात्मनिर्णयः।। तंभक्तिभा

वोभ्यगृणादसत्वरंपरिश्रुतोरुश्रवसंध्रुवक्षितिः ५ ध्रुवउवा
च।। योंतःप्रविश्यममवाचमिमांप्रसुप्तांसंजीवयत्यखिलशक्ति
धरःस्वधाम्ना।। अन्यांश्चहस्तचरणश्रवणत्वगादीन्प्राणान्नमो
भगवतेपुरुषायतुभ्यं।। ६ एकस्त्वमेवभगवन्निदमात्मशक्त्यामा
याख्ययोरुगुणयामहदाद्यशेषं।। सृष्ट्वानुविश्यपुरुषस्तदसद्गु
णेषुनानेवदारुषुविभावसुवद्विभासि ७ त्वद्दत्तयावयुनयेद
मचष्टविश्वंसुप्तप्रबुद्धइवनाथभवत्प्रपन्नः।। तस्यापवर्ग्यशर
णंतवपादमूलंविस्मर्यतेकृतविदाकथमार्तबंधो ८ नूनंवि
मुष्टमतयस्तवमाययातेयेत्वांभवाप्ययविमोक्षणमन्यहेतोः।।

भा०ध्रु० अर्चंति कल्पकतरुं कुणपोपभोग्यमिच्छंति यत्स्पर्शजं नरकेपि
२ नृणां ॥ ९ यानिर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनक
थाश्रवणेन वा स्यात् ॥ सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत्किं
त्वंतकासिलुलितात्पततां विमानात् ॥ १० भक्तिं मुहुः प्रवहतां
त्वयि मे प्रसंगो भूयादनंत महताममलाशयानां ॥ येनांजसो
ल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः ११
ते न स्मरंत्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः ॥
ये त्वब्जनाभ भवदीयपदारविंदसौगंध्यलुब्धहृदयेषु कृतप्रसंगाः १२ २
तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषं ॥

रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वादः ॥ १३
कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान्स्वदृगनंतसखस्तदंके ॥
यन्नाभिसिंधुरुहकांचनलोकपद्मगर्भे द्युमान् भगवते प्रणतोस्मि
तस्मै ॥ १४ ॥ त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदि
पुरुषो भगवांस्त्र्यधीशः ॥ यद्बुद्ध्यवस्थितिमखंडितया स्वदृष्ट्या द्र
ष्टा स्थितावधिमखो व्यतिरिक्त आस्ते १५ यस्मिन्विरुद्धगतयो
ह्यनिशं पतंति विद्यादयो विविधशक्तय आनुपूर्व्यात् ॥ तद्ब्रह्म
विश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहं प्रपद्ये ॥ १६ स
×श्व×त्याशिषो भगवतस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थ

भा॰ ध्रु॰ मूर्तेः॥ अद्येव मार्यभगवान्परिपालिदीनान्वास्त्वेव वत्सकमनुग्र
३ हकालरोस्मान्॥ १७ मैत्रेयउवाच अथाभिष्टुत एवं वै सत्संक
ल्पेनधीमता॥ भृत्यानुरक्तोभगवान्प्रतिनंद्येदमब्रवीत्॥ ॥१८
॥ ॥ इतिश्रीमद्भागवते महापुराणे चतुर्थस्कंधे ध्रुवचरित्रे ध्रु
वस्तकथनंनामनवमोध्यायः॥ ॥ श्रीकृष्णार्पणमस्तु॥

३